

# गणेश अष्टोत्तर शत नाम स्तोत्रम्-विनायको विघ्नराजो गौरीपुत्रो

https://www.chalisa.online

|| गणेश अष्टोत्तर शत नाम स्तोत्रम् ||

विनायको विघ्नराजो गौरीपुत्रो गणेश्वरः ।
स्कंदाग्रजोव्ययः पूतो दक्षोऽध्यक्षो द्विजप्रियः ॥ 1 ॥
अग्निगर्वच्छिदिंद्रश्रीप्रदो वाणीप्रदोऽव्ययः
सर्वसिद्धिप्रदश्शर्वतनयः शर्वरीप्रियः ॥ 2 ॥
सर्वात्मकः सृष्टिकर्ता देवोनेकार्चितश्शिवः ।
शुद्धो बुद्धिप्रियश्शांतो ब्रह्मचारी गजाननः ॥ 3 ॥
द्वैमात्रेयो मुनिस्तुत्यो भक्तविघ्नविनाशनः ।
एकदंतश्चतुर्बाहुश्चतुरश्शक्तिसंयुतः ॥ 4 ॥
लंबोदरश्शूर्पकर्णो हरर्ब्रह्म विदुत्तमः ।
कालो ग्रहपतिः कामी सोमसूर्याग्निलोचनः ॥ 5 ॥
पाशांकुशधरश्चंडो गुणातीतो निरंजनः ।
अकल्मषस्स्वयंसिद्धस्सिद्धार्चितपदांबुजः ॥ 6 ॥
बीजपूरफलासक्तो वरदश्शाश्वतः कृती ।
द्विजप्रियो वीतभयो गदी चक्रीक्षुचापधृत् ॥ 7 ॥
श्रीदोज उत्पलकरः श्रीपतिः स्तुतिहर्षितः ।
कुलाद्रिभेत्ता जटिलः कलिकल्मषनाशनः ॥ 8 ॥
चंद्रचूडामणिः कांतः पापहारी समाहितः ।
अश्रितश्रीकरस्सौम्यो भक्तवांछितदायकः ॥ 9 ॥
शांतः कैवल्यसुखदस्सच्चिदानंदविग्रहः ।
ज्ञानी दयायुतो दांतो ब्रह्मद्वेषविवर्जितः ॥ 10 ॥
प्रमत्तदैत्यभयदः श्रीकंठो विबुधेश्वरः ।
रमार्चितोविधिर्नागराजयज्ञोपवीतवान् ॥ 11 ॥
स्थूलकंठः स्वयंकर्ता सामघोषप्रियः परः ।
स्थूलतुंडोऽग्रणीर्धीरो वागीशस्सिद्धिदायकः ॥ 12 ॥
दूर्वाबिल्वप्रियोऽव्यक्तमूर्तिरद्भुतमूर्तिमान् ।
शैलेंद्रतनुजोत्संगखेलनोत्सुकमानसः ॥ 13 ॥
स्वलावण्यसुधासारो जितमन्मथविग्रहः ।
समस्तजगदाधारो मायी मूषकवाहनः ॥ 14 ॥
हृष्टस्तुष्टः प्रसन्नात्मा सर्वसिद्धिप्रदायकः ।
अष्टोत्तरशतेनैवं नाम्नां विघ्नेश्वरं विभुं ॥ 15 ॥
तुष्टाव शंकरः पुत्रं त्रिपुरं हंतुमुत्यतः ।
यः पूजयेदनेनैव भक्त्या सिद्धिविनायकम् ॥ 16 ॥
दूर्वादलैर्बिल्वपत्रैः पुष्पैर्वा चंदनाक्षतैः ।
सर्वान्कामानवाप्नोति सर्वविघ्नैः प्रमुच्यते ॥

|| https://www.chalisa.online ||